Digitization by eGangotri-South Center

श्रीः

॥ आदिकवि-काव्य-प्रशस्तयः ॥

1. (a) मच्छन्दादेव ते ब्रह्मन्प्रवृत्तेयं सरस्वती ।
रामस्य चरितं कृत्स्नं कुरु त्वम् ऋषिसत्तम ॥

न ते वागनृता काव्ये काचिदत्र भविष्यति ।
कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम् ॥

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ॥

यावद्रामायणकथा त्वत्कृता प्रचरिष्यति ।
तावदूर्ध्वमधश्च त्वं मल्लोकेषु निवत्स्यसि ॥

—वाल्मीकिं प्रति ब्रह्मणो वाक्यं, वाल्मीकिरामायणे १.०२. ३१, ३५-३७.
—Brahmā to Vālmīki in Vālmīki Rāmāyaṇa I. 2. 31, 35-37.

(b) तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम् ॥

—तत्रैव १. २. ४३.
— *Ibid.* I. 2. 43.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(c) कामार्थगुणसंपन्नं धर्मार्थगुणविस्तरम् ।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥
स यथाकथितं पूर्वं नारदेन महर्षिणा ।
रघुवंशस्य चरितं चकार भगवानृषिः ॥

—तत्रैव १. ३. ८-९.
— *Ibid.* 1. 3. 8-9.

(d) पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिस्सप्तभिर्बद्धं तन्त्रीलयसमन्वितम् ॥

—तत्रैव १. ४. ८-९.
— *Ibid.* I. 4. 8-9.

(e) रसैः शृङ्गारकारुण्यहास्यवीरभयानकैः ।
रौद्रादिभिश्च संयुक्तं काव्यमेतदगायताम् ॥
अहो गीतस्य माधुर्यं श्लोकानां च विशेषतः ।
चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम् ॥

— तत्रैव १. ४. १७.
— *Ibid.* I. 4. 17.

(f) आश्चर्यमिदमाख्यानं मुनिना संप्रकीर्तितम् ।
परं कवीनामाधारं समाप्तं च यथाक्रमम् ॥
आयुष्यं पुष्टिजनकं सर्वश्रुतिमनोहरम् ॥

— तत्रैव १. ४. २०-२१.
— *Ibid.* 1. 4. 20-21.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(g) धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम् ।
आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम् ॥

यः पठेच्छृणुयाल्लोके नरः पापाद्विमुच्यते ॥

रामायणमिदं कृत्स्नं शृण्वतः पठतस्सदा ।
प्रीयते सततं रामः स हि विष्णुः सनातनः ॥

आयुष्यमारोग्यकरं यशस्यं
सौभ्रातृकं बुद्धिकरं सुखं च ।
श्रोतव्यमेतन्नियमेन सद्भिः
आख्यानमोजस्करमृद्धिकामैः ॥

एवमेतत् पुरा वृत्तम् आख्यानं भद्रमस्तु वः ।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥

— तत्रैव ६. १३१. १०४, ११५, ११८, ११९.
— *Ibid.* VI. 131. 104, 115, 118, 119.

(h) ततः प्रवृत्तं मधुरं गान्धर्वमतिमानुषम् ।
न च तृप्तिं ययुः सर्वे श्रोतारो गानसंपदा ॥

— तत्रैव ७. ९४. १५.
— *Ibid.* VII. 94. 15.

(i) एतदेव हि काव्यं ते काव्यानामुत्तमं श्रुतम् ।

— तत्रैव रामं प्रति ब्रह्मोक्तिः ७. ९८. १६.
— *Ibid.* Brahmā to Rāma, VII. 98. 16.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. पुरुषो रामचरितं श्रवणैरुपधारयन् ।
आनृशंस्यपरो राजन् कर्मबन्धैर्विमुच्यते ॥

— श्रीमद्भागवते ९. ११. २३.
— S'rīmad Bhāgavata IX. 11. 23.

3. (a) तामभ्यगच्छद्गुदितानुसारी कविः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः ॥

— कालिदासस्य रघुवंशे १४. ७०.
— Kālidāsa's Raghuvamśa XIV. 70.

(b) वृत्तं रामस्य, वाल्मीकेः कृतिः, तौ किन्नरस्वनौ ।
किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम् ॥

तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ ।
हिमनिष्यन्दिनी प्रातः निर्वातेव वनस्थली ॥

— तत्रैव १५. ६४, ६६.
— *Ibid.* XV. 64, 66.

4. (a) प्राचेतसो मुनिवृषा प्रथमः कवीनां
यत्पावनं रघुपतेः प्रणिनाय वृत्तम् ।
भक्तस्य तत्र समरंस्त ममापि वाच-
स्तामु प्रसन्नमनसः कृतिनो भजन्ताम् ॥

— भवभूतेः महावीरचरिते १. ७.
— Bhavabhūti's Mahāvīracarita I. 7.

(b) प्रतिमन्वन्तरं भूतैः गीयमाना चरिष्यति ।
प्रातःपवित्रं लोकानामियं चारित्रपञ्चिका ॥

— तत्रैव ४. ५९.
— *Ibid.* 4. 59.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(c) अथ स भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय ।

हन्त ! पण्डितः संसारः । २. II.

(d) वत्सौ ! रामायणं रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिष्यन्दः, प्रशस्तिरादित्यवंशस्य, तत्कौतूहलेन यत्किञ्चित् श्रोतुमिच्छामि । ६. VI.

(e) भगवान् भूतार्थवादी प्राचेतसः स्थावरजङ्गमं जगदाज्ञापयति— यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनं वचनामृतं करुणादद्भुतरसं च किञ्चिदुपनिबद्धम् — ।

— ७. अन्तर्नाटिकाप्रस्तावनायाम् ।

— VII. Prologue to the Act within Act.

(f) पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतां मातेव गङ्गेव च ।

— ७. २१, भरतवाक्यम्
— VII. 21, final benediction.
— भवभूतेः उत्तररामचरिते ।
—Bhavabhūti's Uttararāmacarita.

5. (a) रामायणमिति शृणोषि तत्रभवतः कवित्वावतारप्रथमतीर्थस्य वल्मीकजन्मनो मुनेः सरस्वतीनिर्यासो यशश्शरीरमिक्ष्वाकूणाम् ।

(b) स्वनिर्भासशब्दब्रह्माणमाचार्यं प्राचेतसम्...।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(c) तमृषिं मनुष्यलोकप्रवेशविश्रामशाखिनं वाचाम् ।
सुरलोकादवतारप्रान्तरखेदच्छिदं वन्दे ॥ १० ॥

— मुरारेः अनर्घराघवे प्रस्तावनायाम् ।

— Murāri's Anargharāghava, Prologue.

6. योगीन्द्रश्छन्दसां द्रष्टा रामायणमहाकविः ।
वल्मीकजन्मा जयति प्राच्यः प्राचेतसो मुनिः ॥

ये विद्यापरमेश्वराः स्तुतधियः ये ब्रह्मपारायणाः
येषां वेदवदादृता स्मृतिमयी वाग्लोकयात्राविधौ ।
स्नाताः स्वर्गतरङ्गिणीमपि सदा पूतां पुनन्त्यत्र ते
व्युत्पत्त्या परया रसोपनिषदां रामायणस्यास्य ते ॥

किं च भगवन् प्रथमकवे !

यदुक्तिमुद्रासुहृदर्थवीथी
कथारसो यच्चुलुकैश्चुलुम्प्यः ।
तथामृतस्यन्दि च यद्वचांसि
रामायणं तत् कवितून् पुनाति ॥

— राजशेखरस्य बालभारते १. १५. १६, १७.

— Rājaśekhara's Bālabhārata I. 15-17.

7. वाल्मीकिरस्तु विजयी प्रथमः कवीनां
तस्यानुसारसरलः स च कालिदासः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अन्ये भवन्तु जयिनः कवयोऽथ मा वा
येषां कृतः कृतिषु नैव मयावगाहः ॥

— उत्प्रेक्षावल्लभस्य भिक्षाटनकाव्ये १. ५.
— Utprekṣāvallabha's Bhikṣāṭana Kāvya.

8. सदूषणापि निर्दोषा सखरापि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ॥

— त्रिविक्रमस्य नलचम्प्वाम् १. ११.
— Trivikrama's Nalacampū, I. 11.

9. यस्मादियं प्रथमतः परमामृतौघ-
निर्घोषिणी सरससूक्तितरङ्गभङ्गिः ।
गङ्गेव धूर्जटिजटाञ्चलतः प्रवृत्ता
वृत्तेन वाक्, तमहमादिकविं प्रपद्ये ॥

— वामननागस्य, जल्हणस्य सूक्तिमुक्तावलौ ।
— Vāmananāga (In Jalhaṇa's Sūktimuktāvalī)

10. अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयभणितीनां मार्गदर्शी महर्षिः ॥

— भोजचम्प्वाम् १. ८
— Bhoja campū I. 8.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

11. प्रस्तावनादिपुरुषौ रघुकौरववंशयोः ।
वन्दे वाल्मीकिकानीनौ सूर्याचन्द्रमसाविव ॥

— धनपालस्य तिलकमञ्जर्याम् १. २०.

— Dhanapāla's Tilakamañjarī I. 20.

12. (a) ज्येष्ठो जयति वाल्मीकिः सर्गबन्धे प्रजापतिः ।
यः सर्वद्वद्वयालीनं काव्यं रामायणं व्यधात् ॥
स्वच्छप्रवाहसुभगा मुनिमण्डलसेविता ।
यस्मात्स्वर्गादिवोत्पन्ना पुण्या प्राची सरस्वती ॥
नुमस्सर्वोपजीव्यं तं कवीनां चक्रवर्तिनम् ।
यस्येन्दुधवलैः श्लोकैः भूषिता भुवनत्रयी ॥

— क्षेमेन्द्रस्य रामायणमञ्जर्यामुपक्रमे २, ३, ४.

— Kṣemendra's Rāmāyaṇamañjarī, beginning 2, 3, 4.

(b) स वः पुनातु वाल्मीकिः सूक्तामृतमहोदधिः ।
ओङ्कार इव वर्णानां कवीनां प्रथमो मुनिः ॥

— क्षेमेन्द्रस्य रामायणमञ्जर्याम् अन्ते ।

— Kṣemendra's Rāmāyaṇamañjarī, end.

13. अन्यो विधाता वाल्मीकिः आदिकाव्यं कमण्डलुः ।
रघुनाथकथा गङ्गा तया पूता जगत्त्रयी ॥
निश्रेण्यौ ब्रह्मलोकस्य वाग्देव्याः कर्णकुण्डले ।
धर्मद्रुममहामूलं वाल्मीकिव्यासयोः कृती ॥

— कविराजस्य राघवपाण्डवीये १. ८. १०.

— Kavirāja's Rāghavapāṇḍavīya I. 8, 10.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

14. विहितघनालङ्कारं विचित्रवर्णावलीमयस्फुरणम् ।
शक्रायुधमिव वक्रं वल्मीकभुवं कविं नौमि ॥

सति काकुत्स्थकुलोन्नतिकारिणि रामायणे किमन्येन ।
रोहति कुल्या गङ्गापूरे किं बहुरसे वहति ॥

— गोवर्धनस्य आर्यासप्तशत्याम् १. ३०, ३२.
— Govardhana's Āryāsaptaśatī I. 30, 32.

15. मुख्यं मुनीनामिह तं कवीनां नमामि येनागमकोविदेन ।
स्वकाव्यदेवायतनेऽधिदेवी प्रतिष्ठिता राघवकीर्तिमूर्तिः ॥

— सोमेश्वरस्य सुरथोत्सवमहाकाव्ये १. ३०.
— Someśvara's Surathotsava Kāvya I. 30.

16. स जयति रघुराजग्रामणी रामचन्द्रः
स च जयति कवित्वोत्पत्तिमूलं मुनीन्द्रः ।
त्रिजगति शतधापि श्रूयमाणा नवेव
प्रमदयति यदीया कीर्तिरुक्तिश्च चेतः ॥

— सोमेश्वरस्य उल्लालराघवनाटके १. ५.
— Someśvara's Ullālarāghava Nāṭaka. I. 5.

17. मम पुनः कविकुलकमलसद्मनि मुनौ वल्मीकजन्मनि मनः कौतुकितम् । यस्यैकमपि वदनारविन्दमासाद्य चतुर्मुखमुखकमलवनविहारविनोदमनुभवति भारती नाम राजहंसी । एवमेतत् । त्रिभुवनाभोगेऽपि हि-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भास्वद्वंशवतंसकीर्तिरमणीरङ्गप्रसङ्गस्वनद्-
वादित्रप्रथमध्वनिर्विजयते वल्मीकजन्मा कविः ।
पीत्वा यद्वदनेन्दुमण्डलगलत्काव्यामृताब्धेः किम-
प्याकल्पं कविनूतनाम्बुदमयी कादम्बिनी वर्षति ॥

— जयदेवस्य प्रसन्नराघवे प्रस्तावनायाम् १. ९.

— Jayadeva's Prasannarāghava, Prastāvanā 1. 9.

18. सदा मृदुपदन्यासाः सालङ्कारा रसावहाः ।
प्रगल्भा इव कामिन्यो जयन्त्यादिकवेर्गिरः ॥

— सर्वेश्वरस्य साहित्यसारे १. २.

— Sarveśvara's Sāhityasāra I. 2.

19. प्रशास्महे नमोवाकं प्राचेतसमहर्षये ।
प्रथमं पप्रथे यत्र तीर्थे सारस्वतामृतम् ॥

— माधवामात्यस्य नरकासुरविजये १. ४३.

— Mādhavāmātya's Narakāsuravijaya I. 43.
(Ms., Sarasvati Mahal, Tanjore).

20. वन्द्यः कस्य न वाल्मीकिः यस्य वाङ्मधुनः कणान् ।
आदाय कवयोऽद्यापि निक्षिपन्ति स्वसूक्तिषु ॥

सुधाया वाक्सुधायाश्च वाल्मीकेर्वदनार्णवात् ।
वक्त्रैस्सुमनसः पूर्वां पिबन्ति श्रवणैः पराम् ॥

—वामनभट्टबाणस्य रघुनाथचरिते १. ७, ८.

— Vāmana Bhaṭṭa Bāṇa's Raghunāthacarita I. 7, 8.
(Tanjore Ms.)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

21. चेतसोऽस्तु प्रसादाय सतां प्राचेतसो मुनिः ।
पृथिव्यां पद्यनिर्माणविद्यायाः प्रथमं पदम् ॥

— गङ्गादेव्याः मधुराविजये १. ५.
— Gangādevī's Madhurāvijaya I. 5.

22. वाल्मीकिरादिकविराडखिलार्थदर्शी
साक्षाद्विरिञ्च इव संप्रतिपन्नभावः ।

— अप्पय्यदीक्षितस्य रामायणसारसङ्ग्रहस्तोत्रे ।
— Appayya Dīkṣita's Rāmāyaṇasārasaṅgraha Stotra.

23. चातुर्यमाद्यस्य कवेर्धरित्रीश्रवोभुवः कस्य न विस्मयाय ।
स्वच्छन्दचाराय वचोऽधिदेव्याः सदाभवद्यत्कृतपादबन्धः ॥
वल्मीकजन्मा कथमेव भूयात् स निर्मभः कर्म मम स्तुतीनाम् ।
यस्य प्रबन्धाद्दशकन्धरारिः इन्धे जगत्यामितरावतारात् ॥

— यज्ञनारायणदीक्षितस्य साहित्यरत्नाकरे १. १५-१६.
— Yajñanārāyaṇa Dīkṣita's Sāhityaratnākara I. 15, 16.

24. उन्मीलयेदुक्तिभरं समग्रं वल्मीकजन्मा कविवल्लभो मे ।
वाणी सुवृत्ताप्यभिसारिणीव वव्रे यमुल्लङ्घितकाननालिः ॥

— राजचूडामणिदीक्षितस्य रुक्मिणीकल्याणे १. ६.
— Rājacūḍāmaṇi Dīkṣita's Rukmiṇīkalyāṇa, I. 6.

25. कान्तः सहृदयो वाचः कविरेव चिरन्तनः ।
जडे जगति येनैव छन्दः प्रागन्वरुध्यत ॥

— नीलकण्ठदीक्षितस्य गङ्गावतरणे १. ३.
— Nīlakaṇṭha Dīkṣita's Gaṅgāvataraṇa I. 3.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

26. आदेशकौ पद्यपथोद्यतानां रत्नाकरौ सूक्तिमहामणीनाम् ।
सन्मार्गसन्दर्शनपुष्पवन्तौ वन्दे कवीनां प्रथमौ मुनीन्द्रौ ॥

— कृष्णकवेः भरतचरिते १. २.

— Kṛṣṇakavi's Bharata Carita I. 2.

27. ज्ञानागोचरपारं निर्मग्नक्रौञ्चसवितृकं वन्दे ।
प्राचेतसं पयोनिधिमसूत यः काव्यकल्पतरुम् ॥
क्रौञ्चस्य पक्षपाती तारकरूपप्रकाशनैकरतः ।
जयति गुहाननुकूलो वाल्मीकिः कविकुलाचार्यः ॥

— विश्वेश्वरकवेः आर्यासप्तशत्याम् १. २८, २९.

—Viśveśvara's Āryāsaptaśatī I. 28, 29.

28. तमोहरां रामकथां समन्ताज्ज्योत्स्नामिवोल्लासितवन्तमुच्चैः ।
पीयूषधामानमिवातिशुद्धं वल्मीकजन्मानमृषिं नमामि ॥
काव्यैः किमन्यैरिह जागरूके रामायणे कर्णरसायनेऽस्मिन् ।
सितोपले भूयसि विद्यमाने कथं हि रोचेत गुडो जनाय ॥

— माधवस्य सप्तशत्याम् ।

— Mādhava's Saptaśatī. (Ms., Library, Bikaner.)

29. जिह्वा यस्य पितामहप्रियवधूलीलानिशान्तस्थली
हृद्यस्यामृतसोदरीसहचरस्वेच्छाविहारालयः ।
गीर्यस्यामितसंपदं वितरति क्षिप्रं पठद्भ्यः सकृत्
सोऽयं नः प्रतिभां ददातु विमलां वल्मीकजन्मा मुनिः ॥

— सुन्दरवीरराघवदासस्य अभिनवराघवनाटके ।

— Sundaravīrarāghava's Abhinavarāghava Nāṭaka (Ms., Govt. Ori. Mss. Library, Madras.)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

30. भाग्येनैव भगीरथादिव पुरा प्राचेतसादागता
या काण्डैरधिगत्य सप्तभिरिव स्रोतोभिरुर्वीतलम् ।
पुण्या पूरयति स्म भूमितनयाभर्तुर्गुणाम्भोनिधिं
तां रामायणजाह्नवीमहरहर्धन्यश्चिरं गाहते ॥
यं ब्रह्माणमिव स्वयं भगवती वत्रे गिरां देवता
ख्यातो यश्च रसज्ञया रघुवृषप्रागल्भ्यसौरज्ञया ।
पुण्यश्लोकतमाय पूर्वकवये वल्मीकलब्धात्मने
तस्मै संप्रति साहितीपथमहापान्थाय बद्धोऽञ्जलिः ॥

— चिन्नबोम्मस्य सङ्गीतराघवे ।
— Cinnabomma's Sangītarāghava. (Tanjore Ms.)

31. वल्मीकजन्मनि मुनौ कृतसन्निधाना
जिह्वाङ्गणात् समवतीर्य पुरा विधातुः ।
अग्रासनं कविषु या वितनार तस्मै
सा भारती विजयतां सुचिरं धरण्याम् ॥

— कृष्णकवेः कविकण्ठाभरणे १.
— Kṛṣṇakavi's Kavikaṇṭhābharaṇa 1 (Adyar Ms.)

32. वन्द्यस्स वल्मीकभवो महर्षिः विशुद्धया यः स्वयमेव वाण्या ।
सुरस्रवन्त्येव पतिः पशूनां भुवोऽवताराय कृतावलम्बः ॥

— मृत्युञ्जयस्य प्रद्युम्नोत्तरचरिते १. ३.
— Mṛtyuñjaya's Pradyumnottaracarita I. 3. (Tanjore Ms.)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

33. यदाननाम्भोजभवा मधूपमा सरस्वती पद्ममयी पुराऽभवत् ।
महाकवेः तस्य विनम्रमौलिना वहेम वाल्मीकिमुनेः पदद्वयम् ॥

— शिवानन्दस्य देवतावतरणे ।
— Śivānanda's Devatāvataraṇa. (Tanjore Ms.)

34. स्मरामि रामायणसर्गबन्धव्रह्माणमाबद्धरसप्रवाहम् ।
योऽद्वैतसिद्धान्ततरङ्गिताया वेदान्तलक्ष्म्याः कुतुकान्यतानीत् ॥

— दुर्गाप्रसादद्विवेदस्य दशकण्ठवधे १. ६.
— Durgāprasādadviveda's Daśakaṇṭhavadha I. 6.

35. सारस्वतांबुप्रसरप्रवृद्धशाखाशताधिष्ठितदिव्यमूर्तिम् ।
आलिङ्गितं रामकथालताभिः वाल्मीकिकल्पद्रुममाश्रयामः ॥

— प्रसन्नरामायणे ।
— Prasannarāmāyaṇa, (Ms., Ori. Library, Madras).

36. वाल्मीकिरुन्मीलिततानवाभिर्वाग्भिः कथं वा मम वर्णनीयः ।
वाग्देवताया वसुधावतारविश्रान्तिसौधं विशदं यमाहुः ॥

— अभिरामकामाक्षीकवेः अभिनवरामाभ्युदये ।
— Abhirāmakāmākṣi's Abhinava Rāmābhyudaya Kāvya. (Ms., Ori. Mss., Library, Madras).

37. नमोऽस्तु तस्मै प्रथमं कवीनामाद्याय योऽजायत मर्त्यलोके ।
विधातृलोकादवतीर्य वाण्या विहर्तुमिच्छोः प्रथमावलम्बः ॥

— लक्ष्मणकवेः रघुवीरविलासे
— Lakṣmaṇakavi's Raghuvīravilāsa Kāvya (Ms., Ori. Library, Madras).

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

38. वाणी वासमवाप यस्य वदनद्वारि प्रतीक्ष्येव हृ-
त्पद्मस्थाम्बुजनाभनाभिनिवसल्लोकेशसेवाक्षणम् ।
वल्मीकप्रभवाय कल्मषभिदे तस्मै परस्मै नमो
रामोदात्तचरित्रवर्णनवचःप्रोद्योगिने योगिने ॥

— दिवाकरस्य अमोघराघवचम्पूम् ।
— Divākara's Amogharāghava Campū.
(Ms., Ori. Library, Madras).

39. सीतारामगुणग्रामपुण्यारण्यविहारिणौ ।
वन्दे विशुद्धविज्ञानौ कवीश्वरकपीश्वरौ ॥

—तुलसीदासस्य रामचरितमानसे ।
—Tulasi's Rāmacaritamānasa.

40. नमस्तस्मै कवीन्द्राय मुनये भावितात्मने ।
भक्त्या वाल्मीकिसंज्ञाय सतां सन्मार्गदायिने ॥

— रामायणसङ्ग्रहे ।
— Rāmāyaṇasamgraha. (Ms., University Mss. Library, Trivandrum).

41. आद्याय कवये तस्मै मूयाद्वाल्मीकये नमः ।
अकामयत यं देवी स्वयमेव सरस्वती ॥

— वरदराजकृतायां रामायणव्याख्यायां
विवेकतिलकाख्यायाम् १. २.
— Varadarāja's commentary Vivekatilaka on the Rāmāyaṇa I. 2. (Ms.).

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

42. वाल्मीकिनामधेयाय मुहुर्वारिमुचे नमः।
यः श्रीरामकथावर्षैः जगत्तापमशीशमत् ॥

—कन्दाडरामानुजकृतायां रामायणव्याख्यायाम् ।
— Kandāḍa Rāmānuja's commentary on Rāmāyana.

43. यादोनाथ्रगभीरमादिमकविं यादोधिनाथात्मजं
यादोनाथमनन्तसद्गुणततेः यादोधिनाथं नगैः।
वक्षन्तं, भरताग्रजं स्ववचनैराशंसमानं मुदा
वाल्मीकिं तमकल्मषं मुनिवरं वन्दे गिरां सिद्धये ॥

— नृसिंहपण्डितकृतायां रामायणव्याख्यायाम् ।
— Nṛsimhapaṇḍita's commentary on the Rāmāyaṇa (Ms., Ori. Library, Madras.)

44. वाल्मीकेर्वदनामलेन्दुगलितं हृद्यं परं पावनं
पुण्यं वागमृतं पिबन्त्यनुदिनं ये श्रोत्रपात्रैर्नराः ।
विष्णोस्सच्चरितं चराचरगुरो रामायणं सादराः
तेषां श्रीर्भवने वसत्यविचला नश्यन्ति चारातयः ॥

— कृष्णतीर्थकृतरामायणव्याख्याने अन्ते ।
— Kṛṣṇatīrtha's Commentary on the Rāmāyaṇa, end. (Ms., Asiatic Society of Bengal)

45. निश्शेषश्रुतिसारभूतममलं सन्तापसन्नाशकं
सीतारामपदारविन्दरसिकैः संसेव्यमानं सदा ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वाल्मीकेर्मुखनिस्सृतं सुरनुतं रामायणं श्रीकरं
ब्रह्माद्यैर्विबुधैर्नितान्तरणितं दद्यात्स्वमर्थं हि नः ॥

— रामायणशिरोमण्याख्यायां व्याख्यायाम् ।
—Rāmāyaṇaśiromaṇi Commentary.

46. श्रीमद्ब्रह्म तदेव बीजममलं यस्याङ्कुरश्चिन्मयः
काण्डैस्सप्तभिरन्वितोऽतिविततो ऋष्यालवालोदितः ।
पत्रैस्तत्त्वसहस्रकैः सुविलसच्छाखाशतैः पञ्चभि-
श्चात्मप्राप्तिफलप्रदो विजयते रामायणः स्तरुः ॥

— रामायणव्याख्याने तिलके ।
—Rāmāyaṇa Commentary, Tilaka.

47. यश्चकार सरस्वत्याः स्वयंवरपतिर्भवन् ।
रामायणं महाकाव्यं तस्मै वाल्मीकये नमः ॥

— रामायणतात्पर्यपर्यालोचनयुक्तिनिर्णीतौ ।
— Rāmāyaṇa-tātparyaparyālocanayuktinirṇīti
(Trivandrum Ms.)

48. सर्गस्थित्युदितं सुवर्णघटितप्रासादलंकारिता-
मापन्नं कमनीयवृत्तरचितश्लोकं प्रकाण्डाकृतिम् ।
कल्पोद्बोधकृदन्वयाञ्चितपदं सद्वर्णनीयस्थितिं
श्रीवल्मीकभुवः प्रबन्धमिव तं श्रीरामभद्रं भजे ॥

— लक्ष्मणभट्टस्य नैषधीयचरितव्याख्यायाम् ।
—Lakṣmaṇa Bhaṭṭa's commentary on Naiṣadhīya
(Ms. BORI. Poona)

49. ज्यायान् जयति वाल्मीकिः काव्यसृष्टिपितामहः ।
शतकोटिविकीर्णं यः चारु रामायणं व्यधात् ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

जयन्ति जगदानन्दकन्दसेकविशारदाः ।
शारदाभ्रप्रतीकाशाः काश्चिदादिकवेर्गिरः ॥

— धनेश्वरस्य चण्डीशतकटीकायाम् ३. ४.

— Dhaneśvara's Caṇḍīśatakaṭīkā 3, 4. (Ms. BORI.)

50. श्रीरामायणमादिकाव्यमृषिणा वाल्मीकिना निर्मितं
वेदान्तार्थविशारदैरनुदिनं स्तुत्यं सुरैरर्चितम् ।
श्रोतृणामघनाशनं सुरतरोस्तुल्यं च मुक्तिप्रदं
ये शृण्वन्ति पठन्ति रामचरितं ते यान्ति विष्णोः पदम् ॥

— रामकर्णामृते ।

— Rāmakarṇāmṛta (Ms., Ori. Library, Madras).

51. चर्चाभिश्चारणानां क्षितिरमणपरां प्राप्य संमोदलीलां
मा कीर्तेः सौविदल्लानवगणय कविव्रातवाणीविलासान् ।
गीतं ख्यातं न नाम्ना किमपि रघुपतेरद्ययावत्प्रसादा-
द्वाल्मीकेरेव धात्रीं धवलयति यशोमुद्रया रामभद्रः ॥

— सूक्तिमुक्तावलौ मुरारेः ।

—Murāri's in Sūktimuktāvalī, GOS.

52. कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ॥

— शार्ङ्गधरपद्धतौ ।

— Śārṅgadhara's Paddhati.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

53. आदिकवी चतुरास्यौ कमलजवल्मीकजौ वन्दे ।
लोकश्लोकविधात्रोः ययोर्भिदा लेशमात्रेण ॥

— सुभाषितरत्नभाण्डागारे
— Subhāṣitaratnabhāṇḍāgāra.

54. कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥

यः पिबन्सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥

यः कर्णाञ्जलिसंपुटैरहरहः सम्यक् पिबत्यादरात्
वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।
जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं
संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥

वाल्मीकिगिरिसंभूता रामसागरगामिनी ।
पुनातु भुवनं पुण्या रामायणमहानदी ॥

श्लोकसारजलाकीर्णं सर्गकल्लोलसंकुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥

CC-0, In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥
शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।
स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥
वाल्मीकेर्गौः मुनीयात्रः महीधरपदाश्रया ।
यद्दुग्धमुपजीवन्ति कवयस्तर्णका इव ॥

— रामायणपारायणसंप्रदायागताः श्लोकाः ॥

— Verses in the tradition of the religious recitation of the Rāmāyaṇa.

CC-0. In Public Domain. Cuddalore Collection. TN.